| BLUE PRINT OF SECOND TERM MODEL QUESTION PAPER 2024 - 2025 | | | |
|---|---|---|---|
| Std IX | | SUB - SANSKRIT | |
| Q. No | Name Of Question | Objective | Marks |
| 1 | अपठितगद्यखण्डः | Understanding | 1 |
| 2 | अपठितगद्यखण्डः | Understanding | 1 |
| 3 | अपठितगद्यखण्डः | Understanding | 1 |
| 4 | अपठितगद्यखण्डः | Remembering | 1 |
| 5 | अपठितगद्यखण्डः | Remembering | 1 |
| 6 | अपठितगद्यखण्डः | Understanding | 1 |
| 7 | अपठितगद्यखण्डः | Understanding | 1 |
| 8 | अपठितगद्यखण्डः | Understanding | 1 |
| 9 | अपठितगद्यखण्डः | Remembering | 1 |
| 10 | अपठितगद्यखण्डः | Remembering | 1 |
| 11 | अपठितगद्यखण्डः | Remembering | 1 |
| 12 | अपठितगद्यखण्डः | Remembering | 1 |
| 13 | अपठितगद्यखण्डः | Understanding | 1 |
| 14 | अपठितगद्यखण्डः | Understanding | 1 |
| 15 | अपठितगद्यखण्डः | Remembering | 1 |
| 16 | अपठितगद्यखण्डः | Understanding | 1 |
| 17 | सन्धिः | Application | 1 |
| 18 | सन्धिः | Application | 1 |
| 19 | प्रश्ननिर्माणम् | Application | 1 |
| 20 | प्रश्ननिर्माणम् | Application | 1 |
| 21 | प्रश्ननिर्माणम् | Application | 1 |
| 22 | प्रत्ययः | Application | 1 |
| 23 | प्रत्ययः | Application | 1 |
| 24 | समासः | Application | 1 |
| 25 | समासः | Application | 1 |
| 26 | सङ्ख्यावाचिपदलेखनम् | Application | 1 |
| 27 | धातुरूपलेखनम् | Application | 1 |
| 28 | धातुरूपलेखनम् | Application | 1 |
| 29 | पर्यायपदलेखनम् | Remembering | 1 |
| 30 | पर्यायपदलेखनम् | Remembering | 1 |
| 31 | विलोमपदलेखनम् | Remembering | 1 |
| 32 | विलोमपदलेखनम् | Remembering | 1 |
| 33 | पठिताधारितप्रश्नाः (गद्यपाठाः) | Remembering | 1 |
| 34 | पठिताधारितप्रश्नाः (गद्यपाठाः) | Remembering | 1 |

| | | | |
|---|---|---|---|
| 35 | पठिताधारितप्र्श्नाः (गद्यपाठाः) | Remembering | 1 |
| 36 | पठिताधारितप्र्श्नाः (गद्यपाठाः) | Remembering | 1 |
| 37 | पठिताधारितप्र्श्नाः (पद्यपाठाः) | Understanding | 1 |
| 38 | पठिताधारितप्र्श्नाः (पद्यपाठाः) | Remembering | 1 |
| 39 | पठिताधारितप्र्श्नाः (पद्यपाठाः) | Remembering | 1 |
| 40 | पठिताधारितप्र्श्नाः (पद्यपाठाः) | Understanding | 1 |
| 41 | पठितगद्यखण्डाधारितप्रश्नाः (दशपदैः उत्तरत ) | Remembering | 2 |
| 42 | पठितगद्यखण्डाधारितप्रश्नाः (दशपदैः उत्तरत ) | Remembering | 2 |
| 43 | पाठाधारितप्रश्नाः (स्वभाषया उत्तरत ) | Understanding | 2 |
| 43 | पाठाधारितप्रश्नाः (स्वभाषया उत्तरत ) | Understanding | *2 |
| 44 | पाठाधारितप्रश्नाः (स्वभाषया उत्तरत ) | Understanding | 2 |
| 44 | पाठाधारितप्रश्नाः (स्वभाषया उत्तरत ) | Understanding | *2 |
| 45 | कः कं प्रति अवदत् । | Remembering | 2 |
| 46 | कः कं प्रति अवदत् । | Remembering | 2 |
| 47 | वाक्यमेलनम् | Remembering | 1 |
| 48 | वाक्यमेलनम् | Remembering | 1 |
| 49 | पठितपद्यखण्डाधारितप्रश्नाः (दशपदैः उत्तरत ) | Understanding | 2 |
| 50 | पठितपद्यखण्डाधारितप्रश्नाः (दशपदैः उत्तरत ) | Understanding | 2 |
| 51 | पद्यखण्डानुवादः | Understanding | 2 |
| 52 | पद्यपूर्तिः | Remembering | 2 |
| 53 | पद्यपूर्तिः | Remembering | 2 |
| 54 | सार्थकवाक्यलेखनम् | Application | 4 |
| 55 | कथापूर्तिः | Application | 4 |
| 56 | घटनाक्रमः | Application | 4 |
| 57 | चित्रवर्णनम् | Skill | 4 |
| | | | |
| | | | |
| | | | 80 |

**MODEL QUESTION PAPER PATTERN FOR THE SECOND TERM EXAM**

**2024-2025**

**STD – IX** **SUB – SANSKRIT**

**MAX.MARKS – 80** **DURATION –3 Hr.**

======================================================

**सूचनाः-**

प्रश्नपत्रिका भागद्वये विभाजिता अस्ति ।

**वस्तुनिष्ठप्रश्ना: (MCQ -४० गुणाः )**

1)आहत्य ४० प्रश्नाः सन्ति |

2) प्र. क्र. १ तः ४० पर्यन्तं बहुविकल्पप्रश्नाः सन्ति। सर्वे प्रश्नाः अनिवार्याः |

**सामान्यप्रश्नाः (SUBJECTIVE ४० गुणाः )**

3) प्रश्नानां क्रमाङ्काः तथा उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि |

4) दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति |

5)सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः |

6)स्वभाषा नाम हिन्दी, मराठी, कोंकणी, आङ्ग्लभाषा वा |

======================================================

**प्रथमभागः**

======================================================

- **अधोलिखितं गद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उचितानि उत्तराणि चिनुत।**

वर्तमानयुगं विज्ञानयुगम् । अस्माकं सर्वासु क्रियासु विज्ञानतत्वानि एव विराजन्ते । पठनक्रियाम् एव पश्यन्तु । पठने अपि विज्ञानस्य सिध्दान्ता: अनुकरणीया: । यदि नेत्रव्यायामं न करिष्याम: तर्हि नेत्रयो: विकार: भवितुं शक्नोति । पुस्तकं यदि नेत्रयो: अति समीपे भवति तर्हि पठितुं न शक्यते । यदा पुस्तकम् अतिदूरं भवति तथा अपि पठनं दुष्करं भवति । नेत्रविशेषज्ञा: कथयन्ति यत् प्रायः पञ्चविंशतिसेण्टिमीटरमितं (25 से. मी.) दूरम् अन्तरं समीचीनम् भवति। तावद्दूरं पुस्तकं गृहित्वा पठने यदि बाधा न अस्ति तदा शोभनं परन्तु यदि न पठ्यते तदा नेत्रचिकित्सकस्य समीपं गत्वा नेत्रपरिक्षणं कारयेत् अन्यथा नेत्रद्दष्टि: दुर्बला भवेत् ।अपि च शयान: अपि न पठेत् । प्रतिदिनं च सूर्योदये नेत्रव्यायाम: करणीय: येन वृद्धावस्थायाम् अपि उपनेत्रस्य आवश्यकता न भवेत्।

प्रश्ना:

1) वर्तमानयुगं कीद्दशम् अस्ति ?

A) ज्ञानमयम् B) विज्ञानमयम्

C ) तत्वज्ञानमयम् D)अज्ञानमयम्

2) नेत्रव्यायाम:  प्रतिदिनं कदा करणीय: ?

A) सायंकाले    B) माध्यान्हे

C) सूर्योदये    D) शयनकाले

3) पठने पुस्तकं नेत्राभ्याम् (25 से. मी.) दूरं भवेत् इति के कथयन्ति ?

A) नेत्रविशेषज्ञा:    B) शिक्षका:    C)सर्वे    D) जना:

4) पठने कस्य सिध्दान्ता:  अनुकरणीया: ?

A) इतिहासस्य    B) अज्ञानस्य

C) विज्ञानस्य.    D) नेत्रस्य

5) यदा पुस्तकम् अतिदूरं भवति तदा किं भवति ?

A) तदा पठनं दुष्करं भवति ।

B) तदा पठनं सुकरं भवति ।

C) तदा पठनं दुर्लभं भवति ।

D) तदा पठनं अज्ञानी भवति ।

6) नेत्रचिकित्सा यदि न कारयेत् तदा किं भवति ?

A) नेत्रदृष्टि:  सुस्पष्टा भवेत् ।

B) नेत्रदृष्टि: दुर्बला भवेत् ।

C) नेत्रदृष्टि: सबला भवेत् ।

D) नेत्रदृष्टि: अबला भवेत् ।

7) नेत्रयो:  विकार:  कदा भवति ?

A) नेत्रयो:  व्यायाम: यदा न करोति तदा ।

B) नेत्रयो:  चिकित्सा यदा करोति तदा ।

C) नेत्रयो: उपयोग: यदा न करोति तदा ।

D) नेत्रयो: पुस्तकपठनं यदा करोति तदा ।

8) वृद्धावस्थायां नेत्रव्यायामेन कस्य आवश्यकता न भवेत् ?

A) उपचारस्य    B) औषधस्य

C)उपनेत्रस्य    D) वैद्यस्य

- **अधोलोखितं गद्यखण्डं पठित्वा प्रदत्तप्रश्नानाम् उचितानि उत्तराणि चिनुत।**

एकदा राजकुमार: सिद्धार्थ: विहारार्थम् उपवनं गत: । सहसा एकं क्रन्दन-ध्वनिं श्रुत्वा स: इतस्तत: अपश्यत् । बाणेन विद्ध: एक: हंस: भूमौ पतित: आसीत् । एतत् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। स: धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अङ्के अधारयत् ।अत्रान्तरे देवदत्त: धावन् तत्र आगतः तदा एव सिद्धार्थस्य हस्ते हंसं दृष्ट्वा स: उच्चै: अवदत्– " सिद्धार्थ ! एष: मम हंस: ।अहं बाणेन एनम् न्यपातयम् । अतः मह्यम् देहि।" सिध्दार्थ: दृढतया अवदत्-"अहं न दास्यामि । अहम् अस्य रक्षक: अस्मि ।" तदा तौ विवादं कुर्वन्तौ राजसभां गतौ ।राजा सर्वं वृत्तान्तम् आकर्ण्य आदिशत्-" यस्य पार्श्वे हंस: आगमिष्यति सः तस्यैव भविष्यति । " हंस: सिद्धार्थस्य समीपं गतवान् ।सत्यमिदम् ।भक्षकात् रक्षक: एव श्रेयान् ।

प्रश्ना:

9) क: भूमौ पतित: आसीत् ?

A) बाण: B) हंस: C)सिद्धार्थ: D) देवदत्त:

10) हंस: कस्य समीपम् गतवान् ?

Aदेवदत्तस्य B) हंसस्य C)सिद्धार्थस्य D) राजकुमारस्य

11)राजा वृत्तान्तम् आकर्ण्य किम् आदिशत्?

A) यस्य पार्श्वे हंस: आगमिष्यति तस्यैव भविष्यति।
B) यस्य अग्रे हंस: आगमिष्यति तस्यैव भविष्यति।
C) यस्य अङ्के हंस: आगमिष्यति तस्यैव भविष्यति।
D) यस्य समीपे हंस: आगमिष्यति तस्यैव भविष्यति ।

12)भक्षकात् क: श्रेयान् ?

A) तक्षक: B) अरक्षक: C) सिद्धार्थ: D) रक्षक:

13) सिद्धार्थ: किं कृत्वा हंसम् अङ्के अधारयत्?

A) शरीरात् बाणं निष्कास्य हंसम् अङ्के अधारयत् ।
B) शरीरात् बाणं योजयित्वा हंसम् अङ्के अधारयत् ।
C) शरीरात् बाणं स्थापयित्वा हंसम् अङ्के अधारयत् ।
D) शरीरात् बाणं दृष्ट्वा हंसम् अङ्के अधारयत् ।

14) सिद्धार्थ: उपवनं किमर्थं गतवान् ?

A) स्नानार्थं B) विहारार्थं C) भोजनार्थं D) आखेटार्थं

15) सिद्धार्थ: कस्य क्रन्दनध्वनिम् अश्रुणोत्?

A) देवदत्तस्य  B) राजकुमारस्य  C) हंसस्य  D) नृपस्य

16) देवदत्त: सिद्धार्थं किम् अवदत् ?

A) एष: मम हंस:,अहं ध्वजेन एनम् निपातयत्

B)एष: मम हंस:, अहं बाणेन एनम् निपातयत्

C)एष: मम हंस:, अहं काष्ठदण्डेन एनम् निपातयत् ।

D)एष: मम हंस:, अहं शिलाखण्डेन एनम् निपातयत् ।

17)" तथा+एव " इत्यस्य सन्धि: किम् ?

A) तथेव  B) तथाएव  C)तथैव  D ) तथाइव

18)कुर्मोऽपि – इत्यस्य सन्धिविच्छेदं लिखित ।

A) कुर्म: + अपि

B) कुर्मो +अपि

C) कर्म: + अपि

D) कुर्मो + पि

*रेखाङ्कितपदस्य स्थाने उचितं प्रश्नवाचकं पदं चित्वा लिखत ।

19) तडागं परित: विविधा: <u>वृक्षा</u>: आसन् ।

A) क:  B) का:  C) के  D) किम्

20) अस्माकं भारतवर्षं <u>रमणीयम्</u> अस्ति ।

A) कीदृशम्  B)कीदृश:  C)कीदृशी  D)किमर्थम्

21)' मये 'तडाग: <u>मये</u> ग्रामे स्थित: ।

A) कदा  B)किं  C) कस्मिन्  D)के

*रिक्तस्थाने उचितं पदं चित्वा लिखत ।

22) मुनि: तपोबलेन कन्यकां ------अवदत् ।

A) कर्तुम्  B) क्रुत्वा  C) कृत्वा  D)कुत्वा

23) भक्त:  देवं (प्र + नम्)----- पूजां करोति ।
A)प्रनम्य  B)प्रणम्य  C)पनम्य  D)प्रणमय

24) ‘ गोपालक: ‘ इत्यस्य उचितं समासविग्रहं चिनुत ।
A) गां पालयति इति । B) गोपालक: इति ।
C) गा पालयति इति । D)गं पालयति इति।

25) ‘अनुपस्थित: ‘ इत्यस्य उचितं समासनाम चिनुत ।
A) षष्ठी तत्पुरुष:  B) अव्ययीभाव:  C) नञ् तत्पुरुष:  D) तृतीयातत्पुरुष:

*रिक्तस्थाने उचितानि पदानि चित्वा लिखत ।
26) विद्यालये 5 विज्ञानशिक्षका: सन्ति । (सङ्ख्यास्थाने सङ्ख्यावाचिपदं लिखत ।)
A) पञ्च:  B) पञ्चम:  C) पञ्चाशत्  D) पञ्च

27)वयम् अभ्यासं कुर्म: । ( वाक्यं लङ्लकारे भूतकाले परिवर्तयत । )
A) वयम् अभ्यासं अकरोत्
B) वयम् अभ्यासं अकुरुत
C) वयम् अभ्यासं अकरवाम
D) वयम् अभ्यासं अकुरुताम

28)छात्र: चित्रं पश्यति । (वाक्यं लृट्लकारे भविष्यकाले  परिवर्तयत ।)
A) छात्र: चित्रं द्रक्ष्यति ।
B) छात्र: चित्रं द्रक्ष्यसि ।
C) छात्र: चित्रं द्रक्ष्यत: ।
D) छात्र: चित्रं द्रक्ष्यन्ति ।

29)’पर्वत:’ इत्यस्य उचितं पर्यायपदं चिनुत।
A) अग्नि:  B) अद्रि:  C) तीर:  D)अनल:

30) ‘कमलम्’ इत्यस्य उचितं पर्यायपदं चिनुत।
A) उपवनम्  B)पुष्पम्  C) पङ्कजम्  D)देवम्

31) ‘निद्रा ’ इत्यस्य उचितं विलोमपदं चिनुत।
A) जगरनम्  B)जगरणम्  C) अनिद्रा  D)जागरणम्

32) ‘ निश्चित: ’  इत्यस्य उचितं विलोमपदं चिनुत ।
A)  सुनिश्चित:     B) कुनिश्चित:     C)  अनिश्चित:     D)अनश्चित:

* उचितं उत्तरं चित्वा लिखत । (33 त: 40 पर्यन्तम् )
33) तक्रं कदा पिबेत् ?
A)  निशान्ते     B)  दिनान्ते   C)  भोजनान्ते     D) प्रातः काले

34) सूर्यस्य आच्छादक: क: ?
A)  पर्वत:     B)  वायु:     C)  मूषक:     D) मेघ:

35) याज्ञवल्क्य:  कुत्र उपविष्ट: ?
A) आम्रवृक्षस्यछायायाम् उपविष्ट: ।
B) न्यग्रोधवृक्षस्यछायायाम् उपविष्ट: ।
C)  कदलीवृक्षस्यछायायाम् उपविष्ट: ।
D) बोधीवृक्षस्यछायायाम् उपविष्ट: ।

36) सरस्तीरे के आगच्छन् ?
A)  धीवरा:     B) पर्यटका:     C)  बालका: .     D) ग्रामजना:

37) भारत-सर्वकारत: जितेन्द्रेण क: पुरस्कार: प्राप्त: ?
A) पद्मविभूषणम्     B) पद्मश्री:     C) अर्जुन:     D) भारतरत्नम्

38) यावज्जीवं तृप्ति:  कया  भवति ?
A) अन्नेन     B) विद्यया     C) श्रद्धया     D) साधनया

39) जितेन्द्रस्य जन्मग्राम: क: ?
A) रामनाथी     B) मङ्गेशी     C) म्हार्दोळ     D) मठग्राम:

40)  परमः धमः कः अस्ति ?
A) ज्ञानम्     B) सज्जनः     C) आचारः     D) उपकारः

=====================================================

==========================================================

## द्वितीयभागः

==========================================================

- **अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत |**

हंसौ अवदताम् “अत्र कः उपायः?” कच्छपः वदति- युवां काष्ठदण्डम् एकं चञ्च्वा धारयताम् | अहं काष्ठदण्डमध्ये अवलम्ब्य युवयोः पक्षबलेन सुखेन अन्यत्र गमिष्यामि|” हंसौ अकथयताम् “सम्भवति एषः उपायः किन्तु अत्र एकः अपायोऽपि वर्तते| आवाभ्यां नीयमानं त्वामवलोक्य जनाः किञ्चिद् वदिष्यन्ति एव | यदि त्वमुत्तरं दास्यसि तदा तव मरणं निश्चितम्| अतः त्वम् अत्रैव वस |” तत् श्रुत्वा क्रुद्धः कूर्मः अवदत्-“किमहं मूर्खः? उत्तरं न दास्यामि| किञ्चिदपि न वदिष्यामि |अतः अहं यथा उक्तवान् तथा युवां कुरुतम् |

प्रश्नाः

41)उपायं श्रुत्वा हंसौ किम् अवदताम् ? (दशपदैः  उत्तरत) (२)

42)कच्छपः कम् उपायं वदति ? (दशपदैः  उत्तरत) (२)

- **प्रश्नानाम्  उत्तराणि स्वभाषया लिखत |**

43)जितेन्द्रे के त्रिगुणाः एकीभूताः आसन् ? (२)

अथवा

याज्ञवल्यः श्येनस्य मुखात् पतितां मूषिकां किम् अकरोत् ?

44)मये तडागस्य वर्णनं पाठाधारेण कुरुत | (२)

अथवा

कन्या सूर्यं, मेघं पर्वतं च कैः शब्दैः अनिन्दत् ?

- **अधस्तनवाक्यानि कः कं प्रति अवदत् इति लिखित्वा पाठस्य नाम च लिखत |**

45) ) “अहमेनाम् सदृशाय वराय प्रयच्छामि |” (२)

46) “अद्य कोऽपि अनुपस्थितः नास्ति | (२)

- **वाक्यांशयोः मेलनं कृत्वा लिखत |**

| | |
|---|---|
| 47)पं.जितेद्र अभिषेकी महोदयः (१)<br>48)गोमन्तकप्रदेशः (१) | ➢ भारतभुवः अलङ्कारः इव शोभते\|<br>➢ उत्तमः सङ्गीतगुरुः इति ख्यातः \|<br>➢ अधोमुखी च अजायत \| |

➢ **अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् सूचनानुसारेण <u>संस्कृतभाषया</u> उत्तरत।**

रविश्चन्द्रो घना वृक्षाः नदी गावश्च सज्जनाः।
एते परोपकाराय युगे देवेन निर्मिताः॥
अन्नदानं परं दानं विद्यादानमतः परम्।
अन्नेन क्षणिका तृप्तिः यावज्जीवं च विद्यया॥

प्रश्नाः

49)परोपकाराय देवेन के निर्मिताः सन्ति ? (दशपदैः उत्तरत ) (२)

50)अन्नेन विद्यया च किं भवति। (२)

➢ **<u>एकस्य</u> पद्यखण्डस्य अनुवादं स्वभाषया लिखत। (२)**

51) स्व-जन्म-भूमि-रक्षणे
प्रयच्छ वीर ! जीवनम्।
शिरः कुरु समुन्नतम्
तवास्तु मा क्वचिद् भयम्॥

**अथवा**

रणे धृतिः सुकौशलम्
प्रवर्धताम् मनोबलम्।
सुनिश्चितो जयस्तव
कुरु स्वधर्मपालनम्॥

➢ **सुभाषितानि पूर्णानि, शुद्धानि च लिखत।**

52)दिनान्ते------------------------|-------------------------|| (२)

53)आचारः-------------------------|------------------------|| (२)

➢ **54)कोष्ठकात् उचितपदानि चित्वा सार्थकवाक्यानि लिखत। (४)**

| | | | |
|---|---|---|---|
| कमलानि | कन्दुकेन | अनुसरति। | (१) |
| यूयम् | सन्मार्गम् | विकसन्ति। | (१) |
| सज्जनः | श्लोकान् | क्रीडन्ति। | (१) |
| बालाः | सरोवरे | पठथ। | (१) |

- **55)मञ्जूषायां दत्तपदानां साहाय्येन संवादपूर्तिं कृत्वा संवादं पुनः लिखत |** **(४)**

( चिन्ता, अम्ब!, निद्रां, गच्छसि, उत्तमा, तव, शिरोवेदना, आनयति )

माता – अनुजे ! त्वं शालां--------------- खलु ?

अनुजा – अम्ब! मम महती------------ अस्ति |

अम्बा – किन्तु अद्य ------------ परीक्षा अस्ति खलु |

अनुजा - ---------------! अस्माकं शिक्षिका-------------अस्ति |

अम्बा – तर्हि----------------नास्ति | औषधं स्वीकृत्य--------- करोतु |

अनुजा – अस्तु| भवती ---------- वा |

अम्बा- आम् | स्वीकरोतु |

56. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत |** **(४)**

- तदा समीपे स्थितः युवकः उक्तवान् यत् अहं निर्मातुं शक्नोमि |
- विनोबा भावे महोदयस्य आज्ञां प्राप्य सः युवकः कर्गजखण्डैः भारतस्य मानचित्रं निर्मितवान् |
- तदा विनोबा महोदयः उक्तवान् यत् – सत्यम् | यदि देशस्य एकीकरणीयः चेत् मानवानां एकत्रीकरणं कर्तव्यम् |
- एकदा विनोबा भावे महोदयः महाविद्यालयच्छात्रेभ्यः एकस्य कर्गजस्य खण्डान् कृत्वा दत्तवान् |
- अनन्तरं उक्तवान् यत् एतस्मिन् कर्गजे भारतस्य मानचित्रं नीर्मितम् आसीत् तथा पुनः निर्माणं कर्तव्यम् |
- युवकः उक्तवान् यत् अहं कर्गजखण्डानां अपरस्मिन् भागे विद्यमानं मानवचित्रस्य निर्माणं कृतवान् तदा स्वतः एव भारतस्य मानवचित्रस्य रचना अभवत् |
- छात्राः बहुप्रयत्नान् कृतवन्तः परन्तु भारतस्य मानचित्रं निर्मातुं असमर्थाः अभवन् |
- विनोबा महोदयः यथाशीघ्रं चित्रं कथं निर्मितवान् इति युवकं पृष्टवान् |

57. **भारतदेशः अथवा सुभाषितानि एतयोः कमपि एकं विषयम् अधिकृत्य अष्टवाक्यानि लिखत |** **(४)**

==============================समाप्तम्==============================